# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

कक्षा - शास्त्री-३ ( Sem_6 ) प्रश्नपत्र-६ गुणाः - ७०

विषयः - पुराणेतिहासः (Old_Syllabus) समयः - ११:०० तः ०२:००

दिनाङ्कः - २३-०४-२०१६ सन्दर्भग्रन्थः -महाभारते भीष्मपर्व

---

### युनिट-१

**प्रश्नः -१ कयोश्चिद् द्वयोः ससन्दर्भं व्याख्या कुरुत ।** ०८

*(१) प्रीतोऽहं पुत्र युध्यस्व जयमाप्नुहि पाण्डव ।*
*यत् तेऽभिलषितं चान्यत् तदवाप्नुहि संयुगे ॥*

*(२) प्रियतां च वरः पार्थ किमस्मत्तोऽभिलाङ्क्षसि ।*
*एवंगते महाराज न तवास्ति पराजयः ॥*

*(३) यतो धर्मस्ततः कृष्णो यतः कृष्णोस्ततो जयः ।*
*युद्ध्यस्व गच्छ कौन्तेय पृच्छ मां किं ब्रवीमि ते ॥*

**प्रश्नः -२ कस्याप्येकस्य वर्णनं क्रियताम् ।** ०८

*(१) गीतामाहात्म्यसारः ।* *(२) युद्धे युधिष्ठिरं प्रति श्रीकृष्णस्याश्वासनम् ।*

**प्रश्नः -३ द्वयोः टिप्पणी कार्या ।** ०४

*(१) धृष्टद्युम्नद्रोणाचार्ययोर्युद्धम् ।* *(२) महाभारते भीष्मपर्व ।*

**प्रश्नः -४ पञ्चानां लघूत्तराणि लिखत ।** ०५

*(१) 'दुर्योधन' शब्दस्य का व्युत्पत्तिः ?*
*(२) युयुत्सुः कस्मिन् पक्षे युद्ध्यति ?*
*(३) जयद्रथः कस्य देशस्य राजासीत् ?*
*(४) पाण्डवपक्षे कति सैन्यानि आसन् ?*
*(५) युधिष्ठिरः केषामाज्ञामादाय युद्धमिच्छति ?*
*(६) लक्ष्मणः कस्य नृपस्य पुत्रः ?*
*(७) "तन्मित्रं यत्र विश्वासः" कस्येदं वाक्यम् ?*

### युनिट-२

**प्रश्नः -५ कयोश्चिद् द्वयोः ससन्दर्भं व्याख्यां कुरुत ।** ०८

*(१) तस्य तत् पूजयामास लाघवं शान्तनोः सुतः ।*
*साधु पार्थ महाबाहो साधु भोः पाण्डुनन्दन ॥*

*(२) नानाशस्त्रौघसम्पन्नैर्नानादेश्यैर्नृपैर्वृतः ।*
*तदन्वेव विराटश्च द्रुपदश्च महारथः ॥*

*(३) शुशुभाते तदा तौ तु शैनेयकुरुपुङ्गवौ ।*
*अमावस्यां गतौ यद्वत् सोमसूर्यौ नभस्तले ॥*

**प्रश्नः -६** **कस्याप्येकस्य समीक्षा कार्या ।** **०८**

*(१) घटोत्कचस्य पराक्रमाः ।* *(२) नरनारायणरूपौ कृष्णार्जुनौ ।*

**प्रश्नः -७** **यथेच्छम् एका टिप्पणी लेख्या ।** **०२**

*(१) भीमसेनन कृतानि युद्धानि ।* *(२) महाभारते चतुर्थदिने सम्भूतं युद्धम् ।*

**प्रश्नः -८** **प्रदत्तेभ्यः द्वयोरुत्तरं संक्षेपेण दत्त ।** **०२**

*(१) 'गाङ्गेयः' इत्यस्य का व्युत्पत्तिः ।*

*(२) 'क्षत्रियर्षभाः' इत्यस्य किं तात्पर्यम् ?*

*(३) 'त्रिदशाः' शब्दस्य कोऽर्थः ?*

*(४) घटोत्कचः कस्य पुत्र आसीत् ?*

## युनिट-३

**प्रश्नः -९** **कयोश्चिद् द्वयोः ससन्दर्भं व्याख्यां कुरुत ।** **०८**

*(१) तव दोषेण युद्धं च प्रवृत्तं सह पाण्डवैः ।*
*तामेवाद्य फलं भुङ्क्षे कृत्वा किल्बिषमात्मना ॥*

*(२) एष धर्मश्च धर्मज्ञो वरदः सर्वकामदः ।*
*एष कर्ता च कार्यं च पूर्वदेवः स्वयम्प्रभुः ॥*

*(३) एष ते विस्तरस्तात संक्षेपस्य प्रकीर्तितः ।*
*केशवस्य यथातत्त्वं सुप्रीतो भज केशवम् ॥*

**प्रश्नः -१०** **कस्याप्येकस्य परिचयः दातव्यः ।** **०८**

*(१) कौरवाणां मकरव्यूहरचना ।* *(२) लक्ष्मणाभिमन्योर्युद्धम् ।*

**प्रश्नः -११** **द्वयोः टिप्पणी कार्या ।** **०४**

*(१) कौरवसैन्यस्य क्रौञ्चव्यूहरचना ।* *(२) युद्धमनुलक्ष्य चिन्तातुरः धृतराष्ट्रः ।*

*(३) भीष्मार्जुनयोर्युद्धम् ।* *(४) महाभारते षष्ठदिने सम्भूतं युद्धम् ।*

**प्रश्नः -१२** **पञ्चानां लघूत्तराणि लिखत ।** **०५**

*(१) पञ्चमो वेदः कः प्रोक्तः ?*

*(२) महाभारते कति श्लोकाः ?*

*(३) पाण्डवाः जेतुं न शक्याः इति कः वदति ?*

*(४) विष्णुकर्णमलोद्भूतः दैत्यः कः ?*

*(५) मधु नामानं दैत्यं कः जघान ?*

*(६) द्रौपदी कति पुत्राणां मातासीत् ?*

*(७) महाभारते कति पर्वाणि सन्ति ?*

---